# संस्कृतवार्ता:

दिनाङ्क:-30.11.2025 प्रात: - 06:55

अथ वार्ताः

## प्रधानमन्त्री/'मन की बात'-कार्यक्रमः

प्रधानमन्त्री नरेन्द्र-मोदी अद्य प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् अष्टाविंशत्यधिकैकशततमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि कार्यक्रम: आकाशवाणी-वार्ता विभागस्य अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्रीकार्यालय-सूचनाप्रसारण-कार्यालयानां यू-ट्यूब वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात् प्रसारणं भविष्यति। हिन्दी-भाषाया प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्या: क्षेत्रीयासु भाषासु अपि भविष्यति।

---

## शीतकालीन सत्र

प्रशासनेन सोमवासरात् आरभ्यमाणस्य संसदः शीतकालीन सत्रात् प्राक् अद्य सर्वदलीयोपवेशनम् आहूतमस्ति। उपवेशनेस्मिन् संसदीयकार्याणां मन्त्री किरेन् रिजिजुः संसदः उभयोः सदनयोः राजनैतिकदलानां नेतृभिश्च सह मेलनं करिष्यति। उपवेशनेस्मिन् प्रशासनम् सत्रावधौ लोकसभायाः राज्यसभायाः च सुचारु रूपेण संचालनं सुनिश्चेतुं सर्वेषां राजनैतिकदलानां सहयोगं याचयिष्यति। एतत् सत्रं दिसम्बर मासस्य प्रथम दिनाङ्कात् आरभ्य दिसम्बर मासस्य ऊनविंशति दिनाङ्कं यावत् प्रचलिष्यति। सत्रावधौ बहवः महत्त्वपूर्णेषु विधेयकेषु चर्चां समेत्य तेषां पारितं भवितुं संभावना वर्तते।

---

## दिल्ली-नगर-निगमस्य

दिल्ली-नगर-निगमस्य (एम्.सी.डी.) इत्यस्य द्वादश विभागानां कृते उप-निर्वाचनं अद्य भविष्यति। मतदानं प्रातः सार्ध-सप्तवादनात् सायं सार्ध-पञ्चवादन पर्यन्तं भविष्यति। अग्रिमे मासे तृतीयदिनाङ्के मतानां गणना भविष्यति।

-----------------------------------------------

## दितवाह्-चक्रवात:

बङ्ग-खात्याः नैऋत्यां दिशि तथा समीपस्थेषु उत्तर-श्रीलङ्का-तमिलनाडु-तटप्रदेशेषु च विद्यमानः दितवाह-चक्रवातः गत षट् होरासु पञ्चकिलोमीटर प्रतिहोरायाः वेगेन उत्तरदिशि गच्छन् तस्मिन् एव प्रदेशे, करैकल-नगरात् पूर्वदिशि प्रायः अशीति कि. मी. दूरे, वेदार-नियम-नगरात् पूर्व-ऐशान्यां दिशि शतं कि.मी. दूरे, पुदुचेरी-नगरात् दक्षिण-दक्षिणपूर्वदिशि षष्ठ्यधिकैकशत कि. मी. दूरे, चेन्नई-नगरात् दक्षिणदिशि सार्द्धद्विशतं कि. मी. दूरे च केन्द्रितः आसीत्। अग्रिमेषु चतुर्विंशति होरासु उत्तर-तमिल्नाडु-पुदुच्चेरी-तटस्य समान्तरं प्रायः उत्तरदिशि गन्तुं शक्यते। उत्तरदिशि गच्छन् अद्य प्रातः सायङ्काले च तमिल्नाडु-पुदुच्चेरी-समुद्रतटात् प्रायः पञ्चाशत् तः पञ्चविंशति की.मी. परिमितेः आभ्यन्तरे नैर्ऋत्य-बङ्गाल-खात्याः उपरि चक्रवात- केन्द्रितः भविष्यति। क्षेत्रीय-ऋतु-विभागस्य अनुसारं, नागपट्टिनार्-नगरस्य कुड्डलूर्-नगरे रेड्-अलर्ट् इति रक्त वर्णिया सञ्चेताना प्रदत्तास्ति। चेन्नई, काञ्चीपुरम् इत्यादिषु द्वादश तटीयमण्डलेषु मध्यमवृष्टेः, राज्यस्य अन्येषु मण्डलेषु लघुः तः मध्यमवृष्टेः च पूर्वानुमानम् प्रकटितम् अस्ति। अत्रान्तरे, अद्य अधिकांशेषु स्थानेषु लघुः मध्यमः वर्षाः भविष्यन्ति, कतिपयेषु स्थानेषु प्रचण्ड तः अतिवृष्टेः सम्भवनापि विद्यते। तटीय-आन्ध्रप्रदेशस्य, यनम्-रायलसीमयोः च पृथक्-पृथक् स्थानेषु अतिवृष्टिः भविष्यति। गृहमन्त्रालयः अवदत् यत् अधिकारिणः तटरक्षकदलेन, राज्यस्य तथा केन्द्रशासितप्रदेशस्य अधिकारिभिः च सह निरन्तरं सम्पर्के सन्ति। केन्द्रीय-गृहसचिवः तमिलनाडु-पुदुचेरी-तेलङ्गाना-आन्ध्रप्रदेश-राज्यानां मुख्यसचिवेन सह सज्जतां समीक्षितवान् तथा समन्वयं स्थापयितुं निर्देशं प्रदत्तवान्। आपत्काले कार्यार्थम् चतुर्दश आपत्-प्रतिक्रिया-दलानि स्थापितानि सन्ति। पुणे-वडोदरा-नगरयोः दश अतिरिक्तानि एन्. डी. आर्. एफ़्-दलानि चेन्नै-नगरं प्रति वायुमार्गेण प्रेषितानि सन्ति।

-----------------------------------------------

## थाईलैण्ड विदेशमंन्त्री

थाईलैण्ड-देशस्य विदेश-मन्त्री सिहासक फुआङ्ग्-केटके-ओ इत्येषः भारतस्य चतुर्दिवसीय यात्रायां देहलीनगरं संप्रप्तवान्। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः गतरात्रौ तस्य आगमने स्वागतानन्तरम् उक्तवान् यत् एषा यात्रा सामरिकसहभागित्वस्य, चिरस्थायी-सभ्यता-सम्बन्धस्य च सुदृढीकरणस्य अवसरः अस्ति। विदेशमन्त्रालयस्य अनुसारं फुआङ्ग्-केटके-ओ अद्य राजधान्यां आधिकारिक उपवेशनं करिष्यति।

।।इति वार्ता:।।